# Sita Upanishad

# સીતોપનિષત્

## Document Information

Text title : Sita Upanishad

File name : sita.itx

Category : upanishhat, svara, devii, sItA, devI

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 45 / 108; Atharva Veda - Shakta upanishad

Latest update : Mar. 8, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# સીતોપનિષત્

ઇચ્છાજ્ઞાનક્રિયાશક્તિત્રયં યદ્ભાવસાધનમ્ ।
તદ્બ્રહ્મસત્તાસામાન્યં સીતાતત્ત્વમુપાસ્મહે ॥

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ ।
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિઃ ।
વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

દેવા હ વૈ પ્રજાપતિમબ્રુવન્કા સીતા કિં રૂપમિતિ ।
સ હોવાચ પ્રજાપતિઃ સા સીતેતિ । મૂલપ્રકૃતિરૂપત્વાત્સા
સીતા પ્રકૃતિઃ સ્મૃતા । પ્રણવપ્રકૃતિરૂપત્વાત્સા સીતા
પ્રકૃતિરુચ્યતે । સીતા ઇતિ ત્રિવર્ણાત્મા સાક્ષાન્માયામયી
ભવેત્ । વિષ્ણુઃ પ્રપઞ્ચબીજં ચ માયા ઈકાર ઉચ્યતે ।
સકારઃ સત્યમમૃતં પ્રાપ્તિઃ સોમશ્ચ કીર્ત્યતે ।
તકારસ્તારલક્ષ્મ્યા ચ વૈરાજઃ પ્રસ્તરઃ સ્મૃતઃ ।
ઈકારરૂપિણી સોમામૃતાવયવદિવ્યાલઙ્કારસ્રઙ્મૌક્તિકા-
દ્યાભરણલઙ્કૃતા મહામાયાઽવ્યક્તરૂપિણી વ્યક્તા ભવતિ ।
પ્રથમા શબ્દબ્રહ્મમયી સ્વાધ્યાયકાલે પ્રસન્ના
ઉદ્ભાવનકરી સાત્મિકા દ્વિતીયા ભૂતલે હલાગ્રે સમુત્પન્ના
તૃતીયા ઈકારરૂપિણી અવ્યક્તસ્વરૂપા ભવતીતિ સીતા
ઇત્યુદાહરન્તિ । શૌનકીયે । શ્રીરામસાન્નિધ્યવશા-
જ્જગદાનન્દકારિણી । ઉત્પત્તિસ્થિતિસંહારકારિણી સર્વદેહિનામ્ ।
સીતા ભગવતી જ્ઞેયા મૂલપ્રકૃતિસંજ્ઞિતા । પ્રણવત્વા-
ત્પ્રકૃરિતિ વદન્તિ બ્રહ્મવાદિન ઇતિ । અથાતો બ્રહ્મજિજ્ઞાસેતિ ચ ।

સા સર્વવેદમયી સર્વદેવમયી સર્વલોકમયી સર્વકીર્તિમયી
સર્વધર્મમયી સર્વાધારકાર્યકારણમયી મહાલક્ષ્મી-
ર્દેવેશસ્ય ભિન્નાભિન્નરૂપા ચેતનાચેતનાત્મિકા
બ્રહ્મસ્થાવરાત્મા તદ્ગુણકર્મવિભાગભેદાચ્છરીરૂપા
દેવર્ષિમનુષ્યગન્ધર્વરૂપા અસુરરાક્ષસભૂતપ્રેત-
પિશાચભૂતાદિભૂતશરીરૂપા ભૂતેન્દ્રિયમનઃપ્રાણરૂપેતિ
ચ વિજ્ઞાયતે ।
સા દેવી ત્રિવિધા ભવતિ શક્ત્યાસના ઇચ્છાશક્તિઃ
ક્રિયાશક્તિઃ સાક્ષાચ્છક્તિરિતિ । ઇચ્છાશક્તિસ્ત્રિવિધા
ભવતિ । શ્રીભૂમિનીલાત્મિકા ભદ્રરૂપિણી પ્રભાવરૂપિણી
સોમસૂર્યાગ્નિરૂપા ભવતિ । સોમાત્મિકા ઓષધીનાં
પ્રભવતિ કલ્પવૃક્ષપુષ્પફલલતાગુલ્માત્મિકા
ઔષધભેષજાત્મિકા અમૃતરૂપા દેવાનાં મહસ્તોમ-
ફલપ્રદા અમૃતેન તૃપ્તિં જનયન્તી દેવાનામન્નેન
પશૂનાં તૃણેન તત્તજ્જીવાનાં સૂર્યાદિસકલભુવન-
પ્રકાશિની દિવા ચ રાત્રિઃ કાલકલાનિમેષમારભ્ય
ઘટિકાષ્ટયામદિવસ(વાર)રાત્રિભેદેન
પક્ષમાસર્ત્વયનસંવત્સરભેદેન મનુષ્યાણાં
શતાયુઃકલ્પનયા પ્રકાશમાના ચિરક્ષિપ્રવ્યપદેશેન
નિમેષમારભ્ય પરાર્ધપર્યન્તં કાલચક્રં
જગચ્ચક્રમિત્યાદિપ્રકારેણ ચક્રવત્પરિવર્તમાનાઃ
સર્વસ્યૈતસ્યૈવ કાલસ્ય વિભાગવિશેષાઃ પ્રકાશરૂપાઃ
કાલરૂપા ભવન્તિ । અગ્નિરૂપા અન્નપાનાદિપ્રાણિનાં
ક્ષુત્તૃષ્ણાત્મિકા દેવાનાં મુખરૂપા વનૌષધીનાં
શીતોષ્ણરૂપા કાષ્ઠેષ્વન્તર્બહિશ્ચ નિત્યાનિત્યરૂપા
ભવતિ । શ્રીદેવી ત્રિવિધં રૂપં કૃત્વા ભગવત્સઙ્કલ્પાનુ-
ગુણ્યેન લોકરક્ષણાર્થં રૂપં ધારયતિ । શ્રીરિતિ લક્ષ્મીરિતિ
લક્ષ્યમાણા ભવતીતિ વિજ્ઞાયતે । ભૂદેવી સસાગરાંભઃ-
સપ્તદ્વીપા વસુન્ધરા ભૂરાદિચતુર્દશભુવનાના-
માધારાધેયા પ્રણવાત્મિકા ભવતિ । નીલા ચ મુખ-
વિદ્યુન્માલિની સર્વૌષધીનાં સર્વપ્રાણિનાં પોષણાર્થં
સર્વરૂપા ભવતિ । સમસ્તભુવનસ્યાધોભાગે જલાકારાત્મિકા

મણ્ડૂકમયેતિ ભુવનાધારેતિ વિજ્ઞાયતે ॥

ક્રિયાશક્તિસ્વરૂપં હરેર્મુખાન્નાદઃ । તન્નાદાદ્બિન્દુઃ ।
બિન્દોરોઙ્કારઃ । ઓઙ્કારાત્પરતો રામ વૈખાનસપર્વતઃ ।
તત્પર્વતે કર્મજ્ઞાનમયીભિર્બહુશાખા ભવન્તિ । તત્ર
ત્રયીમયં શાસ્ત્રમાદ્યં સર્વાર્થદર્શનમ્ ।
ઋગ્યજુઃસામરૂપત્વાત્ત્રયીતિ પરિકીર્તિતા । કાર્યસિદ્ધેન ચતુર્ધા
પરિકીર્તિતા । ઋચો યજૂંષિ સામાનિ અથર્વાઙ્ગિરસસ્તથા ।
ચાતુર્હોત્રપ્રધાનત્વાલ્લિઙ્ગાદિત્રિતયં ત્રયી । અથર્વાઙ્ગિરસં
રૂપં સામઋગ્યજુરાત્મકમ્ । તથા દિશન્ત્યાભિચાર-
સામાન્યેન પૃથક્પૃથક્ । એકવિંશતિશાખાયામૃગ્વેદઃ
પરિકીર્તિતઃ । શતં ચ નવશાખાસુ યજુષામેવ જન્મનામ્ ।
સામ્નઃ સહસ્રશાખાઃ સ્યુઃ પઞ્ચશાખા અથર્વણઃ ।
વૈખાનસમતસ્તસ્મિન્નાદૌ પ્રત્યક્ષદર્શનમ્ । સ્મર્યતે
મુનિભિર્નિત્યં વૈખાનસમતઃ પરમ્ । કલ્પો વ્યાકરણં શિક્ષા
નિરુક્તં જ્યોતિષં છન્દ એતાનિ ષડઙ્ગાનિ ॥

ઉપાઙ્ગમયનં ચૈવ મીમાંસાન્યાયવિસ્તરઃ ।
ધર્મજ્ઞસેવિતાર્થં ચ વેદવેદોઽધિકં તથા ।
નિબન્ધાઃ સર્વશાખા ચ સમયાચારસઙ્ગતિઃ ।
ધર્મશાસ્ત્રં મહર્ષિણામન્તઃકરણસમ્ભૃતમ્ ।
ઇતિહાસપુરાણાખ્યમુપાઙ્ગં ચ પ્રકીર્તિતમ્ ।
વાસ્તુવેદો ધનુર્વેદો ગાન્ધર્વશ્ચ તથા મુને ।
આયુર્વેદશ્ચ પઞ્ચૈતે ઉપવેદાઃ પ્રકીર્તિતાઃ ।
દણ્ડો નીતિશ્ચ વાર્તા ચ વિદ્યા વાયુજયઃ પરઃ ।
એકવિંશતિભેદોઽયં સ્વપ્રકાશઃ પ્રકીર્તિતઃ ।
વૈખાનસઋષેઃ પૂર્વં વિષ્ણોર્વાણી સમુદ્ભવેત્ ।
ત્રયીરૂપેણ સઙ્કલ્પ્ય વૈખાનસઋષેઃ પુરા ।
ઉદિતો યાદૃશઃ પૂર્વં તાદૃશં શ ૃણુ મેઽખિલમ્ ।
શશ્વદ્બ્રહ્મમયં રૂપં ક્રિયાશક્તિરુદાહૃતા ।
સાક્ષાચ્છક્તિર્ભગવતઃ સ્મરણમાત્રરૂપાવિર્ભાવ-
પ્રાદુર્ભાવાત્મિકા નિગ્રહાનુગ્રહરૂપા ભગવત્સહચારિણી
અનપાયિની અનવરતસહાશ્રયિણી ઉદિતાનુદિતાકારા

નિમેષોન્મેષસૃષ્ટિસ્થિતિસંહારતિરોધાનાનુગ્રહાદિ-
સર્વશક્તિસામર્થ્યાત્સાક્ષાચ્છક્તિરિતિ ગીયતે ।
ઇચ્છાશક્તિસ્ત્રિવિધા પ્રલયાવસ્થાયાં વિશ્રમણાર્થં
ભગવતો દક્ષિણવક્ષઃસ્થલે શ્રીવત્સાકૃતિર્ભૂત્વા
વિશ્રામ્યતીતિ સા યોગશક્તિઃ । ભોગશક્તિર્ભોગરૂપા
કલ્પવૃક્ષકામધેનુચિન્તામણિશઙ્ખપદ્મ-
નિધ્યાદિનવનિધિસમાશ્રિતા ભગવદુપાસકાનાં
કામનયા અકામનયા વા ભક્તિયુક્તા નરં
નિત્યનૈમિત્તિકકર્મભિરગ્નિહોત્રાદિભિર્વા યમનિયમાસન-
પ્રાણાયામપ્રત્યાહારધ્યાનધારણાસમાધિભિ-
ર્વાલમણન્વપિ ગોપુરપ્રાકારાદિભિર્વિમાનાદિભિઃ સહ
ભગવદ્વિગ્રહાર્ચાપૂજોપકરણૈરર્ચનૈઃ સ્નાનાધિપર્વા
પિતૃપૂજાદિભિરન્નપાનાદિભિર્વા ભગવત્પ્રીત્યર્થમુક્ત્વા
સર્વં ક્રિયતે । અથાતો વીરશક્તિશ્ચતુર્ભુજાઽભયવરદ-
પદ્મધરા કિરીટાભરણયુતા સર્વદેવૈઃ પરિવૃતા
કલ્પતરુમૂલે ચતુર્ભિર્ગજૈ રત્નઘટૈરમૃતજલૈ-
રભિષિચ્યમાના સર્વદૈવતૈર્બ્રહ્માદિભિર્વન્દ્યમાના
અણિમાદ્યષ્ટૈશ્વર્યયુતા સંમુખે કામધેનુના
સ્તૂયમાના વેદશાસ્ત્રાદિભિઃ સ્તૂયમાના જયાદ્યપ્સર-
સ્સ્ત્રીભિઃ પરિચર્યમાણા આદિત્યસોમાભ્યાં દીપાભ્યાં
પ્રકાશ્યમાના તુમ્બુરુનારદાદિભિર્ગાયમાના
રાકાસિનીવાલીભ્યાં છત્રેણ હ્લાદિનીમાયાભ્યાં ચામરેણ
સ્વાહાસ્વધાભ્યાં વ્યજનેન ભૃગુપુણાદિભિરભ્યર્ચ્યમાના
દેવી દિવ્યસિંહાસને પદ્માસનરૂઢા સકલકારણકાર્યકરી
લક્ષ્મીર્દેવસ્ય પૃથગ્ભવનકલ્પના । અલંચકાર સ્થિરા
પ્રસન્નલોચના સર્વદેવતૈઃ પૂજ્યમાના વીરલક્ષ્મીરિતિ
વિજ્ઞાયત ઇત્યુપનિષત્ ॥

ૐ ભદ્રં કર્ણેભિઃ શ ૃણુયામ દેવાઃ ।
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳ સસ્તનૂભિઃ ।
વ્યશેમ દેવહિતં યદાયુઃ ।

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ સીતોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

---

*Sita Upanishad*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*